ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः

हरिः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता– पद पाठः (वाक्य सहित)

## प्रथमकाण्डे प्रथमः प्रश्नः

Version 1.0 October 31, 2021

# Version Notes:

**This is now the current Version 1.0 dated October 31, 2021.**

1. This replaces the earlier version 1.0 dated June 30, 2021.

2. We have listened to the Pada Parayanam telecast by TTD channel. No corrections found . Further , no corrections found and reported till October 15, 2021.

3. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

4. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Earlier Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 31st March 2019 |
| 2nd | Version Number | 0.1 dated 31st March 2020 |
| 3rd | Version Number | 0.2 dated 30th June 2020 |
| 4th | Version Number | 0.3 dated 31st Aug 2020 |
| 5th | Version Number | 1.0 dated 30th June 2021 |

Table of Contents

1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमं काण्डं.... 11

1.1 प्रथमकाण्डे प्रथमः प्रश्नः – दर्शपूर्णमासौ................ 11

# Introduction and Notes

This Taittireeya Samhita Pada Paata book is being compiled for the benefit of Veda Students for learning, with no commercial purpose. There will be 44 volumes, one book/volume for each Prasna (Subject). This book is being published in Sanskrit, Tamil and Malayalam languages.

**These books are, strictly, for learning under the guidance of a qualified Vedic Guru and not meant for self-learning.**

We thank our guides**, Shri Ganapathy Sharma and Shri Subramania Sharma,** with our namaskarams, who inspired us to compile this book.

## Sources of reference:

We have referred the following two books mainly for this compilation:

1. Taittireeya Samhita printed by Mysore Branch Press in 1894. This has the complete Krishna Yayur Veda Taittireeya Samhita work of great Scholar Shri Bhatta Bhaskara Misra.
2. Taittireeya Samhita printed by Anandashram Press in 1862 containing the work of great Scholar Shri Sayanacharya.

Both these books provide the Pada Paatam of the Taittireeya Samhita at the end of the Panchatis or the end of the Anuvaham or sometimes Prasnam.

## Conventions/Symbols used in this book:

We have used normal conventions for gm, gg, avagraham, Anunaasikam as in other books that have been released.

## Notes and Explanations

## Structure of the Book:

The Vakyam of each Panchati is given as provided in the Samhita book.
The Pada Paatam is provided immediately under each of the Panchatis.
The number of Padams in the Panchati is mentioned in bracket after Panchati number, to ensure the Padam is properly typed and coded as per Source Book.

A Panchati will have 50 Padams only. If the Panchati ends in an Anuvaham, the numbers may not be exactly 50. If the Anuvaham has only one Pachati as in **TS 1.1.1,** the Padam count comes to 43. When the count does not match 50, the indication is made through the Korvai.

If the number of Padams in the last Panchati of an Anuvaham is more than 50, the marking **( )** is made at the end of the $50^{th}$ Padam. The Korvai mentions 'Panchadasa ca) (meaning 15 Padams), we come to know that there are 50+15 = 65 Padams in that Panchati. Example **TS 1.1.6.**

Each of the Panchati will end with the Padam as per the Pada Paatam.
Vakyam is also started and ended with the respective Padam as a check.
The Prasna Korvai, Anuvaha Korvai and Special Korvai, if any, shall be provided after the Pata Padam of the last Panchati of the Anuvaham or Prasnam for reference. Special Korvai shall be provided at the end of respective Panchati as it is given in the source documents.

## **Conventions for Pada Paatam:**

1. Each Panchati will end with a Padam and its Ruk Symbol.
2. Dheerga Swaritam **will be** marked in places the Swaritam needs to be extended in our book. Only the Swaritam is marked in the source books as per Pada Paata conventions.
3. While rendering or study, the rules of Dheerga Swaritam shall be applied
   a) When a Dheerga letter with Swaritam is followed by a Conjunct Consonants (Samyukta Aksharam)
   b) A word with a Dheerga Akshara Anuswaram in the middle of the statement with a Swaritam
   c) The last Aksharam/letter of the Padam has **a Swaritam** and the letter is
      a. A Dheerga Letter **or**
      b. An Anuswaram
4. Kindly refer to our Article on Dheerga Swaritam available in our website **vedavms.in** for the article on basics of Veda Recital – Dheerga Swaritam.
5. Kindly refer to your Guru for exceptions and how the rendering needs to be made.

6. Some common words which are repeated in Pada Padam and what it denotes as per convention are given below:

**आ** + इति = एति

**अति** + इति = अतीति

**अपि** + इति = अपीति

**अधि** **+** इति **=** अधीति

**अभि** + इति = अभीति

**अनु** + इति = अन्विति

**अव** + इति = अवेति

**प्र** + इति = प्रेति

**प्रति** + इति = प्रतीति

**परि** + इति = परीति

परा + इति = परेति

(Special attention is to be given to this word. This is not "para" + "iti". There is no preposition in "para", but it is "parA")

**निः** + इति = निरिति

नि + इति = नीति

वि + इति = वीति

सु + इति = स्विति

सम् + इति = समिति

उप + इति = उपेति

उत् + इति = उदिति

**Note: readers are requested to refer to the Article on Vowel Sandhi.**

When a word needs to be taken as it is without any change, the Pada Padam provides it as **"that word" + 'iti'.** Example, Panchati 4 - विष्णो इति .

=================

**Prarthanaa Mantras:**

1. यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।
तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ।

2. ऋत७ं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलं ।
ऊर्ध्वरेतंविरूपाक्षँविश्वरूपाय वै नमो नमः। *(ओं नमः परमात्मने)*

3. गणानां त्वा गणपति७ं हवामहे कविं कवीना–मुपमश्रवस्तमं ।
ज्येष्ठराजंब्रह्मणां ब्रह्मणस्पत आनश्शृण्वन्नूतिभिः सीदसादनं ।
*(श्री महागणपतयेनमः )*

4. तत्पुरुषायविद्महे महासेनाय धीमहि । तन्नः षण्मुखः प्रचोदयात् ।
*(कुमारगुरवे नमः)*

5. प्रणो देवी सरस्वति वाजेभिर्वाजिनीवति । धीनामवित्र्यवतु ।
**(महासरस्वत्यै नमः)**

6. सदाशिव समारम्भां शंकराचार्य मध्यमां ।
अस्मदाचार्य पर्यन्तां वन्दे गुरु परंभरां । *(श्री गुरुभ्यो नमः)*

7. व्यासं वसिष्ठ नप्तारं शक्तेः पौत्रमकल्मषं ।

पराशरात्मजं वन्दे शुक तातं तपोनिधिं ।

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।

नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः ।

*(श्री वेदव्यासाय नमः)*

=====================

**ओं नमः परमात्मने, श्री महागणपतये नमः, श्री गुरुभ्यो नमः**

**हरिः ओं**

# 1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमं काण्डं

## 1.1 प्रथमकाण्डे प्रथमः प्रश्नः – दर्शपूर्णमासौ

**TS 1.1.1.1**

इषे त्वो,-र्जे त्वा, वायवः स्थोपायवः स्थ, देवो वः सविता प्रार्पयतु

श्रेष्ठतमाय कर्मण, आ प्यायद्ध्वमघ्निया देवभाग-मूर्जस्वतीः पयस्वतीः

प्रजावती-रनमीवा अयक्ष्मा मा वः स्तेन ईशत मा ऽघश७ंसो, रुद्रस्य

हेतिः परि वो वृणक्तु, ध्रुवा अस्मिन् गोपतौ स्यात बह्वीर्, यजमानस्य

पशून् पाहि ॥ 1

**TS 1.1.1.1 Padam**

इषे । त्वा । ऊर्जे । त्वा । वायवः । स्थ । उपायव इत्युप – आयवः ।

स्थ । देवः । वः । सविता । प्रेति । अर्पयतु । श्रेष्ठतमायेति श्रेष्ठ-तमाय ।

कर्मणे । एति । प्यायद्ध्वम् । अघ्नियाः । देवभागमिति देव- भागम् ।

ऊर्जस्वतीः । पयस्वतीः । प्रजावतीरिति प्रजा-वतीः । अनमीवाः ।

अयक्ष्माः । मा । वः । स्तेनः । ईशत । मा ।

अघश॒ꣳस इत्यघ – श॒ꣳसः । रुद्रस्य । हेतिः । परीति । वः ।
वृणक्तु । ध्रुवाः । अस्मिन्न् । गोपताविति गो –पतौ । स्यात । बह्वीः ।
यजमानस्य । पशून् । पाहि ॥ **1 (43)** **(इषे–त्रिचत्वारिꣳशत् )***(A1)*

**TS 1.1.2.1**

यज्ञस्य घोषदसि, प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयः, प्रेयमगाद्–धिषणा
बर्.हिरच्छ मनुना कृता स्वधया वितष्टा त आ वहन्ति कवयः पुरस्ताद्
देवेभ्यो जुष्टमिह बर्.हिरासदे, देवानां परिषूतमसि वर्.षवृद्धमसि,
देवबर्.हिर्मा त्वा ऽन्वङ् मा तिर्यक्, पर्व ते राद्ध्यासमा–च्छेत्ता ते
मा रिषं, देवबर्.हिः शतवल्.शं ँवि रोह, सहस्रवल्.शाः [ ] **2**

**TS 1.1.2.1-Padam**

यज्ञस्य । घोषत् । असि । प्रत्युष्टमिति प्रति – उष्टम् । रक्षः । प्रत्युष्टा
इति प्रति – उष्टाः । अरातयः । प्रेति । इयम् । अगात् । धिषणा ।
बर्.हिः । अच्छ । मनुना । कृता । स्वधयेति स्व–धया । वितष्टेति
वि – तष्टा । ते । एति । वहन्ति । कवयः । पुरस्तात् । देवेभ्यः ।
जुष्टम् । इह । बर्.हिः । आसद इत्या – सदे । देवानाम् ।
परिषूतमिति परि –सूतम् । असि । वर्.षवृद्धमिति वर्.ष–वृद्धम् ।

असि । देवबर्.हिरिति देव –बर्.हिः । मा । त्वा । अन्वक् । मा ।

तिर्यक् । पर्व । ते । राद्ध्यासम् । आच्छेत्तेत्या – छेत्ता । ते । मा ।

रिषम् । देवबर्.हिरिति देव–बर्.हिः । शतवल्.शमिति शत–वल्.शम् ।

वीति । रोह । सहस्रवल्.शा इति सहस्र –वल्.शाः । **2 (50)**

**TS 1.1.2.2**

वि वयꣳ रुहेम, पृथिव्याः संपृचः पाहि, सुसंभृता त्वा

सं भराम्यदित्यै रास्ना ऽसीन्द्राण्यै सन्नहनं, पूषा ते ग्रन्थिं ग्रथ्नातु,

स ते मा ऽऽ स्थादिन्द्रस्य त्वा बाहुभ्यामुद्–यच्छे, बृहस्पते

मूर्द्ध्ना हरा,–म्युर्वन्तरिक्षमन्विहि, देवंगममसि ॥ **3**

**TS 1.1.2.2 Padam**

वीति । वयम् । रुहेम । पृथिव्याः । संपृच इति सं – पृचः । पाहि ।

सुसंभृतेति सु – संभृता । त्वा । समिति । भरामि । अदित्यै । रास्ना ।

असि । इन्द्राण्यै । संनहनमिति सं – नहनम् । पूषा । ते । ग्रन्थिम् ।

ग्रथ्नातु । सः । ते । मा । एति । स्थात् । इन्द्रस्य । त्वा । बाहुभ्यामिति

बाहु–भ्याम् । उदिति । यच्छे । बृहस्पतेः । मूर्द्ध्ना । हरामि । उरु ।

अन्तरिक्षम् । अन्विति । इहि । देवङ्गममिति देवम् – गमम् ।

असि ॥ **3 (38) (सहस्रवल्.शा–अष्टात्रि॑ँशच्च)** *(A2)*

**TS 1.1.3.1**

शुन्धद्ध्वं दैव्याय कर्मणे देवयज्यायै, मातरिश्वनो घर्मो ऽसि द्यौरसि पृथिव्यसि विश्वधाया असि परमेण धाम्ना दृ॑ँहस्व मा ह्वार्, वसूनां पवित्रमसि शतधारं ँवसूनां पवित्रमसि सहस्रधार॑ँ, हुतः स्तोको हुतो द्रफ्सो ऽग्नये बृहते नाकाय स्वाहा द्यावापृथिवीभ्या॑ँ, सा विश्वायुः, सा विश्वव्यचाः, सा विश्वकर्मा, सं पृच्यद्ध्व–मृतावरी–रूर्मिणी–र्मधुमत्तमा मन्द्रा धनस्य सातये, सोमेन ( ) त्वाऽऽ तनच्मीन्द्राय दधि, विष्णो हव्य॑ँ रक्षस्व ॥ **4**

**TS 1.1.3.1-Padam**

शुन्धद्ध्वम् । दैव्याय । कर्मणे । देवयज्याया इति देव –यज्यायै । मातरिश्वनः । घर्मः । असि । द्यौः । असि । पृथिवी । असि । विश्वधाया इति विश्व –धायाः । असि । परमेण । धाम्ना । दृ॑ँहस्व । मा । ह्वाः । वसूनाम् । पवित्रम् । असि । शतधारमिति शत –धारम् । वसूनाम् । पवित्रम् । असि । सहस्रधारमिति सहस्र – धारम् । हुतः । स्तोकः ।

हुतः । द्रप्सः । अग्नये । बृहते । नाकाय । स्वाहा ।

द्यावापृथिवीभ्यामिति द्यावा– पृथिवीभ्याम् । सा ।

विश्वायुरिति विश्व–आयुः । सा ।

विश्वव्यचा इति विश्व –व्यचाः । सा । विश्वकर्मेति विश्व –कर्मा ।

समिति । पृच्यद्ध्वम् । ऋतावरीरित्यृत – वरीः । ऊर्मिणीः । मधुमत्तमा इति मधुमत्–तमाः । मन्द्राः । धनस्य । सातये । सोमेन ( ) । त्वा । एति । तनच्मि । इन्द्राय । दधि । विष्णो इति । हव्यम् । रक्षस्व ॥ **4**

**(58) (सोमे–नाष्टौ च )** *(A3)*

**TS 1.1.4.1**

कर्मणे वां देवेभ्यः शकेयं, वेषाय त्वा, प्रत्युष्ट॰ रक्षः प्रत्युष्टा अरातयो, धूरसि धूर्व धूर्वन्तं धूर्व तं यो ऽस्मान् धूर्वति तं धूर्वयं वयं धूर्वाम, –स्त्वं देवानामसि सस्नितमं पप्रितमं जुष्टतमं वह्नितमं देवहूतम–

मह्रुतमसि हविर्धानं, दृ॰हस्व मा ह्वार्, मित्रस्य त्वा चक्षुषा प्रेक्षे मा भेर्मा सं विक्था मा त्वा –[ ] **5**

**TS 1.1.4.1-Padam**

कर्मणे । वाम् । देवेभ्यः । शकेयम् । वेषाय । त्वा । प्रत्युष्टमिति

प्रति –उष्टम् । रक्षः । प्रत्युष्टा इति प्रति –उष्टाः । अरातयः । धूः ।

असि । धूर्व । धूर्वन्तम् । धूर्व । तम् । यः । अस्मान् । धूर्वति । तम् ।

धर्व । यम् । वयम् । धूर्वामः । त्वम् । देवानाम् । असि ।

सस्नितममिति सस्नि–तमम् । पप्रितममिति पप्रि –तमम् ।

जुष्टतममिति जुष्ट – तमम् । वह्नितममिति वह्नि – तमम् ।

देवहूतममिति देव–हूतमम् । अह्रुतम् । असि ।

हविर्धानमिति हविः – धानम् । दृꣳहस्व । मा । ह्वाः ।

मित्रस्य । त्वा । चक्षुषा । प्रेति । ईक्षे । मा । भेः । मा ।

समिति । विक्थाः । मा । त्वा । **5 (50)**

**TS 1.1.4.2**

हिꣳसिष,–मुरु वाताय, देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां,

पूष्णो हस्ताभ्या–मग्नये जुष्टं निर्वपाम्यग्नीषोमाभ्या–मिदं देवाना–

मिदमु नः सह, स्फात्यै त्वा नारात्यै, सुवरभि वि ख्येषं,

वैँश्वानरं ज्योतिर्, दृ॒ꣳहन्तां दुर्या द्यावापृथिव्यो,–रुर्वन्तरिक्ष

मन्वि,–ह्यदित्यास्त्वोपस्थे सादयाम्यग्ने हव्यꣳ रक्षस्व ॥ **6**

**TS 1.1.4.2**

हिꣳसिषम् । उरु । वाताय । देवस्य । त्वा । सवितुः । प्रसव इति

प्र –सवे । अश्विनोः । बाहुभ्यामिति बाहु – भ्याम् । पूष्णः ।

हस्ताभ्याम् । अग्नये । जुष्टम् । निरिति । वपामि ।

अग्नीषोमाभ्यामित्यग्नी–सोमाभ्याम् । इदम् । देवानाम् । इदम् । उ ।

नः । सह । स्फात्यै । त्वा । न । अरात्यै । सुवः । अभि । वीति ।

ख्येषम् । वैश्वानरम् । ज्योतिः । दृꣳहन्ताम् । दुर्याः । द्यावापृथिव्योरिति

द्यावा – पृथिव्योः । उरु । अन्तरिक्षम् । अन्विति । इहि । अदित्याः ।

त्वा । उपस्थ इत्युप–स्थे । सादयामि । अग्ने । हव्यम् ।

रक्षस्व ॥ **6 (46)**

**(मा त्वा–षट्चत्वारिꣳशच्च)** *(A4)*

**TS 1.1.5.1**

देवो वः सवितोत् पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभि,

–रापो देवीरग्रेपुवो अग्रेगुवो ऽग्र इमं यँज्ञं नयताग्रे यज्ञपतिं

धत्तयुष्मानिन्द्रो ऽवृणीत वृत्रतूर्ये, यूयमिन्द्रमवृणीद्ध्वं वृँत्रतूर्येप्रोक्षिताः स्था,–ग्नये वो जुष्टं प्रोक्षाम्यग्नीषोमाभ्या७ं शुन्धद्ध्वं दैव्याय कर्मणे देवयज्याया, अवधूत७ं रक्षो ऽवधूता अरातयो ऽदित्यास्त्वगसि प्रति त्वा –[ ] **7**

**TS 1.1.5.1-Padam**

देवः । वः । सविता । उदिति । पुनातु । अच्छिद्रेण । पवित्रेण । वसोः । सूर्यस्य । रश्मिभिरिति रश्मि – भिः । आपः । देवीः । अग्रेपुव इत्यग्रे–पुवः । अग्रेगुव इत्यग्रे–गुवः । अग्रे । इमम् । यज्ञम् । नयत । अग्रे । यज्ञपतिमिति यज्ञ – पतिम् । धत्त । युष्मान् । इन्द्रः । अवृणीत । वृत्रतूर्य इति वृत्र –तूर्ये । यूयम् । इन्द्रम् । अवृणीद्ध्वम् । वृत्रतूर्य इति वृत्र –तूर्ये । प्रोक्षिता इति प्र –उक्षिताः । स्थ । अग्नये । वः । जुष्टम् । प्रेति । उक्षामि । अग्नीषोमाभ्यामित्यग्नी – सोमाभ्याम् । शुन्धद्ध्वम् । दैव्याय । कर्मणे । देवयज्याया इति देव–यज्यायै । अवधूतमित्यव – धूतम् । रक्षः । अवधूता इत्यव – धूताः । अरातयः । अदित्याः । त्वक् । असि । प्रतीति । त्वा । **7 (50)**

**TS 1.1.5.2**

पृथिवी वेत्त्व,–धिषवणमसि वानस्पत्यं प्रति त्वा ऽदित्यास्त्वग्–वेत्त्वग्ने–स्तनूरसि वाचो विसर्जनं देववीतये त्वा गृह्णा,–म्यद्रिरसि वानस्पत्यः स इदं देवेभ्यो हव्य॒ सुशमि शमि,–ष्वेषमा वदोर्जमा वद द्युमद्–वदत वय॒ सङ्घातं जेष्म, वर्.षवृद्धमसि, प्रति त्वा वर्.षवृद्धं वेत्तु, परापूत॒ रक्षः परापूता अरातयो, रक्षसां भागो ( ) ऽसि, वायुर्वो वि विनक्तु, देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु ॥ 8

**TS 1.1.5.2**

पृथिवी । वेत्तु । अधिषवणमित्यधि – सवनम् । असि । वानस्पत्यम् । प्रतीति । त्वा । अदित्याः । त्वक् । वेत्तु । अग्नेः । तनूः । असि । वाचः । विसर्जनमिति वि–सर्जनम् । देववीतय इति देव– वीतये । त्वा । गृह्णामि । अद्रिः । असि । वानस्पत्यः । सः । इदम् । देवेभ्यः । हव्यम् । सुशमीति सु– शमि । शमिष्व । इषम् । एति । वद । ऊर्जम् । एति । वद । द्युमदिति द्यु–मत् । वदत । वयम् । सङ्घातमिति सं–घातम् । जेष्म । वर्.षवृद्धमिति वर्.ष –वृद्धम् । असि । प्रतीति । त्वा । वर्.षवृद्धमिति वर्.ष–वृद्धम् । वेत्तु ।

परापूतमिति परा – पूतम् । रक्षः । परापूता इति परा– पूताः ।

अरातयः । रक्षसाम् । भागः ( ) । असि ।

वायुः । वः । वीति । विनक्तु । देवः । वः । सविता ।

हिरण्यपाणिरिति हिरण्य – पाणिः । प्रतीति । गृह्णातु ॥ **8 (61)**

**(त्वा – भाग – एकादश च)** *(A5)*

**TS 1.1.6.1**

अवधूतꣳ रक्षो ऽवधूता अरातयो ऽदित्यास्त्वगसि प्रति त्वा पृथिवी वेत्तु, दिवः स्कंभनिरसि प्रति त्वा ऽदित्यास्त्वग्–वेत्तु, धिषणा ऽसि पर्वत्या प्रति त्वा दिवः स्कंभनिर्वेत्तु, धिषणा ऽसि पार्वतेयी प्रति त्वा पर्वति वेत्तु, देवस्य त्वा सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णोहस्ताभ्यामधि वपामि धान्यमसि धिनुहि देवान्, प्राणाय त्वा, ( ) ऽपानाय त्वा, व्यानाय त्वा, दीर्घामनु प्रसितिमायुषे धां, देवो वः सविता हिरण्यपाणिः प्रति गृह्णातु ॥ **9**

**TS 1.1.6.1-Padam**

अवधूतमित्यव – धूतम् । रक्षः । अवधूता इत्यव – धूताः । अरातयः ।

अदित्याः । त्वक् । असि । प्रतीति । त्वा । पृथिवी । वेत्तु । दिवः ।

स्कम्भनिः । असि । प्रतीति । त्वा । अदित्याः । त्वक् । वेत्तु । धिषणा ।
असि । पर्वत्या । प्रतीति । त्वा । दिवः । स्कम्भनिः । वेत्तु । धिषणा ।
असि । पार्वतेयी । प्रतीति । त्वा । पर्वतिः । वेत्तु । देवस्य । त्वा ।
सवितुः । प्रसव इति प्र –सवे । अश्विनोः । बाहुभ्यामिति –बाहुभ्याम् ।
पूष्णः । हस्ताभ्याम् । अधीति । वपामि । धान्यम् । असि । धिनुहि ।
देवान् । प्राणायेति प्र – अनाय । त्वा ( ) । अपानात्येप – अनाय ।
त्वा । व्यानायेति वि– अनाय । त्वा । दीर्घाम् । अन्विति ।
प्रसितिमिति प्र – सितिम् । आयुषे । धाम् । देवः । वः । सविता ।
हिरण्यपाणिरिति हिरण्य – पाणिः । प्रतीति । गृह्णातु ॥ **9 (65)**

**(प्राणाय त्वा – पञ्चदश च)** *(A6)*

**TS 1.1.7.1**

धृष्टिरसि ब्रह्म यच्छापाग्ने ऽग्निमामादं जहि, नि ष्क्रव्याद९ं सेधाऽऽ
देवयजं ँवह, निर्दग्ध९ं रक्षो निर्दग्धा अरातयो ध्रुवमसि पृथिवीं
दृ९ंहाऽऽयुर्दृ९ंह प्रजां दृ९ंह सजातानस्मै यजमानाय पर्यूह,
धर्त्रमस्यन्तरिक्षं दृ९ंह प्राणं दृ९ंहापानं दृ९ंह सजातानस्मै यजमानाय
पर्यूह, धरुणमसि दिवं दृ९ंह चक्षुर् –[ ] 10

**TS 1.1.7.1-Padam**

धृष्टिः । असि । ब्रह्म । यच्छ । अपेति । अग्ने । अग्निम् ।
आमादमित्याम –अदम् । जहि । निरिति । क्रव्यादमिति क्रव्य–अदम् ।
सेध । एति । देवयजमिति देव – यजम् । वह । निर्दग्धमिति
निः – दग्धम् । रक्षः । निर्दग्धा इति निः– दग्धाः । अरातयः। ध्रुवम् ।
असि । पृथिवीम् । दृ॒ꣳह । आयुः । दृ॒ꣳह । प्रजामिति प्र –जाम् ।
दृ॒ꣳह । सजातानिति स–जातान् । अस्मै । यजमानाय । परीति । ऊह ।
धर्त्रम् । असि । अन्तरिक्षम् । दृ॒ꣳह । प्राणमिति प्र– अनम् । दृ॒ꣳह ।
अपानमित्यप – अनम् । दृ॒ꣳह । सजातानिति स–जातान् । अस्मै ।
यजमानाय । परीति । ऊह । धरुणम् । असि । दिवम् । दृ॒ꣳह ।
चक्षुः । **10 (50)**

**TS 1.1.7.2**

दृ॒ꣳह श्रोत्रं दृ॒ꣳह सजातानस्मै यजमानाय पर्यूह, धर्मासि दिशो
दृ॒ꣳह योनिं दृ॒ꣳह प्रजां दृ॒ꣳह सजातानस्मै यजमानाय पर्यूह, चितः
स्थ प्रजामस्मै रयिमस्मै सजातानस्मै यजमानाय पर्यूह, भृगूणामङ्गिरसां

तपसा तप्यद्ध्वं, सँयानि घर्मे कपालान्युप–चिन्वन्ति वेधसः ।

पूष्णस्तान्यपि व्रत इन्द्रवायू वि मुञ्चतां ॥ **11**

**TS 1.1.7.2-Padam**

दृ॒ꣳह । श्रोत्रम् । दृ॒ꣳह । सजातानिति स–जातान् । अस्मै ।

यजमानाय । परीति । ऊह । धर्म । असि । दिशः । दृ॒ꣳह । योनिम् ।

दृ॒ꣳह । प्रजामिति प्र –जाम् । दृ॒ꣳह । सजातानिति स–जातान् ।

अस्मै । यजमानाय । परीति । ऊह । चितः । स्थ । प्रजामिति

प्र –जाम् । अस्मै । रयिम् । अस्मै । सजातानिति स–जातान् ।

अस्मै । यजमानाय । परीति । ऊह । भृगूणाम् । अङ्गिरसाम् । तपसा ।

तप्यद्ध्वम् । यानि । घर्मे । कपालानि । उपचिन्वन्तीत्युप – चिन्वन्ति ।

वेधसः ॥ पूष्णः । तानि । अपीति । व्रते । इन्द्रवायू इतीन्द्र–वायू ।

वीति । मुञ्चताम् ॥ **11 (48)** **(चक्षु – रष्टाचत्वारिꣳशच्च)** *(A7)*

**TS 1.1.8.1**

सं ँवपामि, समापो अद्भिरग्मत समोषधयो रसेनसꣳ रेवती र्जगतीभि

र्मधुमती र्मधुमतीभिः सृज्यद्ध्व,–मद्भ्यः परि प्रजाताः स्थ समद्भिः

पृच्यद्ध्वं, जनयत्यै त्वा सं ँयौम्यग्नये त्वा, ऽग्नीषोमाभ्यां, मखस्य

शिरो ऽसि, घर्मो ऽसि विश्वायु,–रुरु प्रथस्वोरु ते यज्ञपतिः प्रथतां,
त्वचं गृह्णी,–ष्वान्तरित॒ꣳ रक्षो ऽन्तरिता अरातयो, देवस्त्वा सविता ( )
श्रपयतु वर्.षिष्ठे अधि नाके ऽग्निस्ते तनुवं मा ऽति धागग्ने हव्यꣳ
रक्षस्व, सं ब्रह्मणा पृच्य,–स्वैकताय स्वाहा, द्विताय स्वाहा, त्रिताय
स्वाहा ॥ **12**

**TS 1.1.8.1 –Padam**

समिति । वपामि । समिति । आपः । अद्भिरित्यत् – भिः । अग्मत ।
समिति । ओषधयः । रसेन । समिति । रेवतीः । जगतीभिः ।
मधुमतीरिति मधु – मतीः । मधुमतीभिरिति मधु – मतीभिः ।
सृज्यद्ध्वम् । अद्भ्य इत्यत् – भ्यः । परीति ।
प्रजाता इति प्र –जाताः । स्थ । समिति । अद्भिरित्यत् – भिः ।
पृच्यद्ध्वम् । जनयत्यै । त्वा । समिति । यौमि । अग्नये । त्वा ।
अग्नीषोमाभ्यामित्यग्नी – सोमाभ्याम् । मखस्य । शिरः । असि ।
घर्मः । असि । विश्वायुरुरिति विश्व– आयुः । उरु ।
प्रथस्व । उरु । ते । यज्ञपतिरिति यज्ञ – पतिः । प्रथताम् ।

त्वचम् । गृह्णीष्व । अन्तरितमित्यन्तः –इतम् । रक्षः । अन्तरिता

इत्यन्तः – इताः । अरातयः । देवः । त्वा । सविता ( ) । श्रपयतु ।

वर्.षिष्ठे । अधीति । नाके । अग्निः । ते । तनुवम् । मा । अतीति ।

धाक् । अग्ने । हव्यम् । रक्षस्व । समिति । ब्रह्मणा । पृच्यस्व ।

एकताय । स्वाहा । द्विताय । स्वाहा । त्रिताय । स्वाहा ॥ **12 (72)**

**(सविता–द्वावि॑ँशतिश्च)** *(A8)*

**TS 1.1.9.1**

आ दद, इन्द्रस्य बाहुरसि दक्षिणः सहस्रभृष्टिः शततेजावायुरसि

तिग्मतेजाः, पृथिवि देवयज–न्योषद्ध्यास्ते मूलं मा हि॑ँसिष,–

मपहतो ऽररुः पृथिव्यै, व्रजं गच्छ गोस्थानं, ँवर्.षतु ते द्यौर्बधान देव

सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान् द्वेष्टि यं च वयं

द्विष्मस्तमतो मा मौगपहतो ऽररुः पृथिव्यै देवयजन्यै, व्रजं –[] **13**

**TS 1.1.9.1 –Padam**

एति । ददे । इन्द्रस्य । बाहुः । असि । दक्षिणः । सहस्रभृष्टिरिति

सहस्र –भृष्टिः । शततेजा इति शत –तेजाः । वायुः । असि ।

तिग्मतेजा इति तिग्म – तेजाः । पृथिवि । देवयजनीति देव –यजनि ।

ओषद्ध्याः । ते । मूलम् । मा । हि॒ꣳसिषम् । अपहत इत्यप –हतः । अररुः । पृथिव्यै । व्रजम् । गच्छ । गोस्थानमिति गो–स्थानम् । वर्.षतु । ते । द्यौः । बधान । देव । सवितः । परमस्याम् । परावतीति परा – वति । शतेन । पाशैः । यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः । तम् । अतः । मा । मौक् । अपहत इत्यप–हतः । अररुः । पृथिव्यै । देवयजन्या इति देव –यजन्यै । व्रजम् । **13 (50)**

**TS 1.1.9.2**

गच्छ गोस्थानं, ँवर्.षतु ते द्यौर्बधान देव सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा मौगपहतो ऽररुः पृथिव्या अदेवयजनो, व्रजं गच्छ गोस्थानं, ँवर्.षतु ते द्यौ, र्बधान देव सवितः परमस्यां परावति शतेन पाशैर्यो ऽस्मान् द्वेष्टि यं च वयं द्विष्मस्तमतो मा –[] **14**

**TS 1.1.9.2 –Padam**

गच्छ । गोस्थानमिति गो–स्थानम् । वर्.षतु । ते । द्यौः । बधान । देव । सवितः । परमस्याम् । परावतीति परा – वति । शतेन । पाशैः । यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः । तम् । अतः । मा ।

मौक् । अपहत इत्यप –हतः । अररुः । पृथिव्याः । अदेवयजन इत्यदेव – यजनः । व्रजम् । गच्छ । गोस्थानमिति गो–स्थानम् । वर्.षतु । ते । द्यौः । बधान । देव । सवितः । परमस्याम् । परावतीति परा – वति । शतेन । पाशैः । यः । अस्मान् । द्वेष्टि । यम् । च । वयम् । द्विष्मः । तम् । अतः । मा । **14 (50)**

**TS 1.1.9.3**

मौ,–गररुस्ते दिवं मा स्कान्., वसवस्त्वा परि गृह्णन्तु गायत्रेण छन्दसा, रुद्रास्त्वा परि गृह्णन्तु त्रैष्टुभेन छन्दसा ऽऽदित्यास्त्वा परि गृह्णन्तु जागतेन छन्दसा, देवस्य सवितुः सवे कर्म कृण्वन्ति वेधस, ऋतम,–स्यृतसदनम,–स्यृतश्रीरसि, धा असि स्वधा अस्युर्वी चासि वस्वी चासि पुरा क्रूरस्य विसृपो विरफ्शिन्, ( ) नुदादाय पृथिवीं जीरदानुर्यामैरयन् चन्द्रमसि स्वधाभिस्तां धीरासो अनुदृश्य यजन्ते ॥ **15**

**TS 1.1.9.3 –Padam**

मौक् । अररुः । ते । दिवम् । मा । स्कान् । वसवः । त्वा । परीति । गृह्णन्तु । गायत्रेण । छन्दसा । रुद्राः । त्वा । परीति । गृह्णन्तु । त्रैष्टुभेन । छन्दसा । आदित्याः । त्वा । परीति । गृह्णन्तु । जागतेन । छन्दसा ।

देवस्य । सवितुः । सवे । कर्म । कृण्वन्ति । वेधसः । ऋतम् । असि ।
ऋतसदनमित्यृत –सदनम् । असि । ऋतश्रीरित्यृत – श्रीः । असि ।
धाः । असि । स्वधेति स्व– धा । असि । उर्वी । च । असि । वस्वी ।
च । असि । पुरा । क्रूरस्य । विसृप इति वि– सृपः ।
विरफ्शिन्निति वि– रफ्शिन्न् ( ) । उदादायेत्युत् – आदाय । पृथिवीम् ।
जीरदानुरिति जीर – दानुः । याम् । ऐरयन्न् । चन्द्रमसि ।
स्वधाभिरिति स्व–धाभिः । ताम् । धीरासः ।
अनुदृश्येत्यनु – दृश्य । यजन्ते ॥ **15 (61)**

**(देवयजन्यै व्रजं – तमतो मा – विरफ्शिन् – नेकादश च)** *(A9)*

**TS 1.1.10.1**

प्रत्युष्ट॒ँ रक्षः प्रत्युष्टा अरातयो, ऽग्नेर्वस्तेजिष्ठेन तेजसा निष्टपामि,
गोष्ठं मा निर्मृक्षं ँवाजिनं त्वा सपत्नसाह॒ँ सं मार्ज्मि, वाचं प्राणं,
चक्षुः श्रोत्रं, प्रजां ँयोनिं मा निर्मृक्षं ँवाजिनीं त्वा सपत्नसाही॒ँ
सं मार्ज्म्या, शासाना सौमनसं प्रजा॒ँ सौभाग्यं तनूं ।

अग्नेरनुव्रता भूत्वा सं नह्ये सुकृताय कं ॥

सुप्रजसस्त्वा वयꣳ सुपत्नीरुप –[ ] **16**

**TS 1.1.10.1 –Padam**

प्रत्युष्टमिति प्रति – उष्टम् । रक्षः । प्रत्युष्टा इति प्रति –उष्टाः ।

अरातयः । अग्नेः । वः । तेजिष्ठेन । तेजसा । निरिति । तपामि ।

गोष्ठमिति गो –स्थम् । मा । निरिति । मृक्षम् । वाजिनम् । त्वा ।

सपत्नसाहमिति सपत्न – साहम् । समिति । मार्ज्मि । वाचम् ।

प्राणमिति प्रा– अनम् । चक्षुः । श्रोत्रम् । प्रजामिति प्र –जाम् ।

योनिम् । मा । निरिति । मृक्षम् । वाजिनीम् । त्वा । सपत्नसाहीमिति

सपत्न– साहीम् । समिति । मार्ज्मि । आशासानेत्या – शासाना ।

सौमनसम् । प्रजामिति प्र –जाम् । सौभाग्यम् । तनूम् ॥ अग्नेः ।

अनुव्रतेत्यनु –व्रता । भूत्वा । समिति । नह्ये ।

सुकृतायेति सु –कृताय । कम् ॥ सुप्रजस इति सु–प्रजसः ।

त्वा । वयम् । सुपत्नीरिति सु–पत्नीः । उपेति । **16 (50)**

**TS 1.1.10.2**

सेदिम ।

अग्ने सपत्नदंभनमदब्धासो अदाभ्यं ॥

इमं ँवि ष्यामि वरुणस्य पाशं ँयमबद्ध्नीत सविता सुकेतः ।

धातुश्च योनौ सुकृतस्य लोके स्योनं मे सह पत्या करोमि ॥

समायुषा सं प्रजया समग्ने वर्चसा पुनः ।

सं पत्नी पत्या ऽहं गच्छे समात्मा तनुवा मम ॥

महीनां पयो ऽस्योषधीनाꣳ रसस्तस्य ते ऽक्षीयमाणस्य निर् –[ ] **17**

**TS 1.1.10.2 –Padam**

सेदिम ॥ अग्ने । सपत्नदम्भनमिति सपत्न–दम्भनम् । अदब्धासः ।

अदाभ्यम् ॥ इमम् । वीति । स्यामि । वरुणस्य । पाशम् । यम् ।

अबद्ध्नीत । सविता । सुकेत इति सु–केतः ॥ धातुः । च । योनौ ।

सुकृतस्येति सु –कृतस्य । लोके । स्योनम् । मे । सह । पत्या ।

करोमि ॥ समिति । आयुषा । समिति । प्रजयेति प्र–जया । समिति ।

अग्ने । वर्चसा । पुनः ॥ समिति । पत्नी । पत्या । अहम् । गच्छे ।

समिति । आत्मा । तनुवा । मम ॥ महीनाम् । पयः । असि ।

ओषधीनाम् । रसः । तस्य । ते । अक्षीयमाणस्य । निरिति । **17 (50)**

**TS 1.1.10.3**

वपामि, महीनां पयो ऽस्योषधीना ँ रसो ऽदब्धेन त्वा चक्षुषा ऽवेक्षे

सुप्रजास्त्वाय, तेजो ऽसि, तेजो ऽनु प्रे,–ह्यग्निस्ते तेजो मा वि

नै,–दग्नेर्जिह्वा ऽसि सुभूर्देवानां धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे भव,

शुक्रमसि, ज्योतिरसि, तेजो ऽसि, देवो वः सवितोत् पुनात्वच्छिद्रेण

पवित्रेण वसोः सूर्यस्य रश्मिभिः, शुक्रं ( ) त्वा शुक्रायां धाम्नेधाम्ने

देवेभ्यो यजुषेयजुषे गृह्णामि, ज्योतिस्त्वा ज्योतिष्यर्चिस्त्वा ऽर्चिषि

धाम्नेधाम्ने देवेभ्यो यजुषेयजुषे गृह्णामि ॥ **18**

**TS 1.1.10.3 –Padam**

वपामि । महीनाम् । पयः । असि । ओषधीनाम् । रसः । अदब्धेन ।

त्वा । चक्षुषा । अवेति । ईक्षे । सुप्रजास्त्वायेति सुप्रजाः – त्वाय ।

तेजः । असि । तेजः । अनु । प्रेति । इहि । अग्निः । ते । तेजः । मा ।

वीति । नैत् । अग्नेः । जिह्वा । असि । सुभूरिति सु – भूः । देवानाम् ।

धाम्नेधाम्न इति धाम्ने – धाम्ने । देवेभ्यः ।

यजुषेयजुष इति यजुषे –यजुषे । भव । शुक्रम् । असि । ज्योतिः ।
असि । तेजः । असि । देवः । वः । सविता । उदिति । पुनातु ।
अच्छिद्रेण । पवित्रेण । वसोः । सूर्यस्य । रश्मिभिरिति रश्मि–भिः ।
शुक्रम् ( ) । त्वा । शुक्रायाम् । धाम्ने धाम्न इति धाम्ने – धाम्ने ।
देवेभ्यः । यजुषेयजुष इति यजुषे –यजुषे । गृह्णामि । ज्योतिः । त्वा ।
ज्योतिषि । अर्चिः । त्वा । अर्चिषि । धाम्ने धाम्न इति धाम्ने – धाम्ने ।
देवेभ्यः । यजुषेयजुष इति यजुषे –यजुषे । गृह्णामि ॥ **18 (66)**

**(उप – नि – रश्मिभिः शुक्रꣳ – षोडश च)** *(A10)*

**TS 1.1.11.1**

कृष्णो ऽस्याखरेष्ठो ऽग्नये त्वा स्वाहा, वेदिरसि बर्.हिषे त्वा स्वाहा,
बर्.हिरसि स्रुग्भ्यस्त्वा स्वाहा, दिवे त्वा, ऽन्तरिक्षाय त्वा, पृथिव्यै त्वा,
स्वधा पितृभ्य ऊग्–र्भव बर्.हिषद्भ्य ऊर्जा पृथिवीं गच्छतविष्णोः
स्तूपो ऽस्यूर्णाम्रदसं त्वा स्तृणामि स्वासस्थं देवेभ्यो गन्धर्वो ऽसि
विश्वावसु र्विश्वस्मादीषतो यजमानस्य परिधिरिड ईडितइन्द्रस्य
बाहुरसि –[ ] **19**

**TS 1.1.11.1 –Padam**

कृष्णः । असि । आखरेष्ठ इत्याखरे – स्थः । अग्नये । त्वा । स्वाहा ।

वेदिः । असि । बर्.हिषे । त्वा । स्वाहा । बर्.हिः । असि । स्रुग्भ्य इति

स्रुक् –भ्यः । त्वा । स्वाहा । दिवे । त्वा । अन्तरिक्षाय । त्वा ।

पृथिव्यै । त्वा । स्वधेति स्व–धा । पितृभ्य इति पितृ –भ्यः । ऊर्क् ।

भव । बर्.हिषद्भ्य इति बर्.हिषत्–भ्यः । ऊर्जा । पृथिवीम् । गच्छत ।

विष्णोः । स्तूपः । असि । ऊर्णाम्रदसमित्यूर्णा – म्रदसम् । त्वा ।

स्तृणामि । स्वासस्थमिति सु –आसस्थम् । देवेभ्यः । गन्धर्वः ।

असि । विश्वावसुरिति विश्व – वसुः । विश्वस्मात् । ईषतः ।

यजमानस्य । परिधिरिति परि – धिः । इडः । ईडितः । इन्द्रस्य ।

बाहुः । असि । **19 (50)**

**TS 1.1.11.2**

दक्षिणो यजमानस्य परिधिरिड ईडितो मित्रावरुणौ त्वोत्तरतः परि धत्तां

ध्रुवेण धर्मणा यजमानस्य परिधिरिड ईडितः सूर्यस्त्वा पुरस्तात् पातु

कस्याश्चिदभिशस्त्यावीतिहोत्रं त्वा कवे द्युमन्त९ँ समिधीमह्यग्ने

बृहन्तमद्ध्वरे विशो यन्त्रे स्थो वसूना९ँ रुद्राणा–मादित्याना९ँ

सदसि सीद जुहूरुपभृद् ध्रुवा ऽसि घृताची नाम्ना प्रियेण नाम्ना प्रिये सदसि ( ) सीदैता असदन्थ् सुकृतस्य लोके ता विष्णो पाहि पाहि यज्ञं पाहि यज्ञपतिंपाहि मां यँज्ञनियं ॥ **20**

**TS 1.1.11.2 -Padam**

दक्षिणः । यजमानस्य । परिधिरिति परि – धिः । इडः । ईडितः । मित्रावरुणाविति मित्रा – वरुणौ । त्वा । उत्तरत इत्युत् – तरतः । परीति । धत्ताम् । ध्रुवेण । धर्मणा । यजमानस्य । परिधिरिति परि–धिः । इडः । ईडितः । सूर्यः । त्वा । पुरस्तात् । पातु । कस्याः । चित् । अभिशस्त्या इत्यभि –शस्त्याः । वीतिहोत्रमिति वीति – होत्रम् । त्वा । कवे । द्युमन्तमिति द्यु – मन्तम् । समिति । इधीमहि । अग्ने । बृहन्तम् । अद्ध्वरे । विशः । यन्त्रे इति । स्थः । वसूनाम् । रुद्राणाम् । आदित्यानाम् । सदसि । सीद । जुहूः । उपभृदित्युप – भृत् । ध्रुवा । असि । घृताची । नाम्ना । प्रियेण । नाम्ना । प्रिये । सदसि ( ) । सीद । एताः । असदन्न् । सुकृतस्येति सु–कृतस्य । लोके । ताः । विष्णो इति । पाहि । पाहि ।

यज्ञम् । पाहि । यज्ञपतिमिति यज्ञ–पतिम् । पाहि । माम् ।
यज्ञनियमिति यज्ञ – नियम् ॥ **20 (65)**

**(बाहुरसि – प्रिये सदसि – पञ्चदश च)** *(A11)*

**TS 1.1.12.1**

भुवनमसि वि प्रथस्वाग्ने यष्टरिदं नमः ।
जुह्वेह्यग्निस्त्वा ह्वयति देवयज्याया उपभृदेहि देवस्त्वा सविता ह्वयति
देवयज्याया अग्नाविष्णू मा वामव क्रमिषं ँवि जिहाथां मा मा सं ताप्तं
ँल्लोकं मे लोककृतौ कृणुतं ँविष्णोः स्थानमसीत इन्द्रो अकृणोद्
वीर्याणि समारभ्योर्द्ध्वो अद्ध्वरो दिविस्पृशमह्रुतो ( )
यज्ञो यज्ञपते–रिन्द्रावान्थ् स्वाहा बृहद्–भाः पाहि मा ऽग्ने दुश्चरितादा
मा सुचरिते भज मखस्य शिरो ऽसि सं ज्योतिषा ज्योतिरङ्क्तां ॥ **21**

**TS 1.1.12.1 –Padam**

भुवनम् । असि । वीति । प्रथस्व । अग्ने । यष्टः । इदम् । नमः ॥
जुहु । एति । इहि । अग्निः । त्वा । ह्वयति । देवयज्याया इति
देव –यज्यायै । उपभृदित्युप –भृत् । एति । इहि । देवः । त्वा ।
सविता । ह्वयति । देवयज्याया इति देव –यज्यायै ।

अग्नाविष्णू इत्यग्ना –विष्णू । मा ।

वाम् । अवेति । क्रमिषम् । वीति । जिहाथाम् । मा । मा । समिति ।

ताप्तम् । लोकम् । मे । लोककृताविति लोक–कृतौ । कृणुतम् ।

विष्णोः । स्थानम् । असि । इतः । इन्द्रः । अकृणोत् । वीर्याणि ।

समारभ्येति सं–आरभ्य । ऊर्द्ध्वः । अद्ध्वरः । दिविस्पृशमिति

दिवि –स्पृशम् । अह्रुतः ( ) । यज्ञः । यज्ञपतेरिति यज्ञ – पतेः ।

इन्द्रावानितीन्द्र – वान् । स्वाहा । बृहत् । भाः । पाहि । मा । अग्ने ।

दुश्चरितादिति दुः – चरितात् । एति । मा । सुचरित इति सु – चरिते ।

भज । मखस्य । शिरः । असि । समिति । ज्योतिषा । ज्योतिः ।

अङ्क्ताम् ॥ 21 **(71)** **(अह्रुत – एकविꣳशतिश्च)** *(A12)*

**<u>TS 1.1.13.1</u>**

वाजस्य मा प्रसवेनोद्ग्राभेणो–दग्रभीत् ।

अथा सपत्नाꣳ इन्द्रो मे निग्राभेणाधराꣳ अकः ॥

उद्ग्राभं च निग्राभं च ब्रह्म देवा अवीवृधन्न् ।

अथा सपत्नानिन्द्राग्नी मे विषूचीनान् व्यस्यतां ॥

वसुभ्यस्त्वा रुद्रेभ्यस्त्वा ऽऽदित्येभ्यस्त्वा ऽक्त८ रिहाणा वियन्तु वयः ॥
प्रजां ँयोनिं मा निर्मृक्षमा प्यायन्तामाप ओषधयो
मरुतां पृषतयः स्थ दिवं –[] 22

**TS 1.1.13.1 –Padam**

वाजस्य । मा । प्रसवेनेति प्र–सवेन । उद्ग्राभेणेत्युत् – ग्राभेण ।
उदिति । अग्रभीत् ॥ अथ । सपत्नान् । इन्द्रः । मे । निग्राभेणेति
नि–ग्राभेण । अधरान् । अकः ॥ उद्ग्राभमित्युत् –ग्राभम् । च ।
निग्राभमिति नि –ग्राभम् । च । ब्रह्म । देवाः । अवीवृधन्न् ॥ अथ ।
सपत्नान् । इन्द्राग्नी इतीन्द–अग्नी । मे । विषूचीनान् । वीति ।
अस्यताम् ॥ वसुभ्य इति वसु–भ्यः । त्वा । रुद्रेभ्यः । त्वा ।
आदित्येभ्यः । त्वा । अक्तम् । रिहाणाः । वियन्तु । वयः ॥
प्रजामिति प्र–जाम् । योनिम् । मा । निरिति । मृक्षम् । एति ।
प्यायन्ताम् । आपः । ओषधयः । मरुताम् । पृषतयः ।
स्थ । दिवं । 22 (50)

**TS 1.1.13.2**

गच्छ ततो नो वृष्टिमेरय ।

आयुष्पा अग्ने ऽस्यायुर्मे पाहि चक्षुष्पा अग्ने ऽसि चक्षुर्मे पाहि

ध्रुवा ऽसि यं परिधिं पर्यधत्था अग्ने देव पणिभिर्वीयमाणः ।

तं त एतमनु जोषं भरामि नेदेष त्वदपचेतयातैयज्ञस्य पाथ

उप समितꣳ सꣳस्रावभागाः स्थेषा बृहन्तः प्रस्तरेष्ठा

बर्.हिषदश्च–[ ] **23**

**TS 1.1.13.2 –Padam**

गच्छ । ततः । नः । वृष्टिम् । एति । ईरय ॥ आयुष्पा इत्यायुः– पाः ।

अग्ने । असि । आयुः । मे । पाहि । चक्षुष्पा इति चक्षुः – पाः ।

अग्ने । असि । चक्षुः । मे । पाहि । ध्रुवा । असि । यम् ।

परिधिमिति परि –धिम् । पर्यधत्था इति परि –अधत्थाः । अग्ने । देव ।

पणिभिरिति पणि –भिः । वीयमाणः ॥ तम् । ते । एतम् । अन्विति ।

जोषम् । भरामि । न । इत् । एषः । त्वत् ।

अपचेतयाता इत्यप – चेतयातै । यज्ञस्य । पाथः । उप । समिति ।

इतम् । सꣳस्रावभागा इति सꣳस्राव –भागाः । स्थ । इषाः । बृहन्तः ।

प्रस्तरेष्ठा इति प्रस्तरे–स्थाः । बर्.हिषद इति बर्.हि–सदः ।

च । **23 (50)**

**TS 1.1.13.3**

देवा इमां ँवाचमभि विश्वे गृणन्त आसद्यास्मिन् बर्.हिषि मादयद्ध्वमग्ने

र्वामपन्नगृहस्य सदसि सादयामि सुंनाय सुंनिनी सुंने मा धत्तं धुरि

धुर्यौ पातमग्ने ऽदब्धायो ऽशीततनो पाहि मा ऽद्य दिवः पाहि प्रसित्यै

पाहि दुरिष्ट्यै पाहि दुरद्मन्यै पाहि दुश्चरितादविषं नः पितुं कृणु सुषदा

योनि७ स्वाहा देवा गातुविदो गातुं ँवित्त्वा गातु ( ) –मित मनसस्पत

इमं नो देव देवेषु यज्ञ७ स्वाहा वाचि स्वाहा वाते धाः ॥ **24**

**TS 1.1.13.3 –Padam**

देवाः । इमाम् । वाचम् । अभीति । विश्वे । गृणन्तः। आसद्येत्या–सद्य ।

अस्मिन् । बर्.हिषि । मादयद्ध्वम् । अग्नेः । वाम् ।

अपन्नगृहस्येत्यपन्न – गृहस्य । सदसि । सादयामि । सुम्नाय ।

सुम्निनी इति । सुम्ने । मा । धत्तम् । धुरि । धुर्यौ । पातम् । अग्ने ।

अदब्धायो इत्यदब्ध–आयो । अशीततनो इत्यशित –तनो । पाहि । मा ।

अद्य । दिवः । पाहि । प्रसित्या इति प्र–सित्यै । पाहि । दुरिष्ष्या इति
दुः –इष्ष्यै । पाहि । दुरद्मन्या इति दुः –अद्मन्यै । पाहि । दुश्चरितादिति
दुः – चरितात् । अविषम् । नः । पितुम् । कृणु । सुषदेति सु –सदा ।
योनिम् । स्वाहा । देवाः । गातुविद इति गातु–विदः । गातुम् । वित्त्वा ।
गातुम् ( ) । इत । मनसः । पते । इमम् । नः । देव । देवेषु । यज्ञम् ।
स्वाहा । वाचि । स्वाहा । वाते । धाः ॥ **24 (63)**

**(दिवं – च – वित्त्वा गातुं – त्रयोदश च)** (*A13*)

**TS 1.1.14.1**

उभा वामिन्द्राग्नी आहुवद्ध्या उभा राधसः सह मादयद्ध्यै ।
उभा दाताराविषाꣳ रयीणामुभा वाजस्य सातये हुवे वां ॥
अश्रवꣳ हि भूरिदावत्तरा वां ँविजामातुरुत वा **घा** स्यालात् ।
**अथा** सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यं ॥
इन्द्राग्नी नवतिं पुरो दासपत्नीरधूनुतं ।
साकमेकेन कर्मणा ॥
शुचिं नु स्तोमं नवजात–मद्येन्द्राग्नी वृत्रहणा जुषेथां । **25**

**TS 1.1.14.1-Padam**

उभा । वाम् । इन्द्राग्नी इतीन्द्र – अग्नी । आहुवद्ध्यै । उभा ।

राधसः । सह । मादयद्ध्यै ॥ उभा । दातारौ । इषाम् । रयीणाम् ।

उभा । वाजस्य । सातये । हुवे । वाम् ॥ अश्रवम् । हि ।

भूरिदावत्तरेति भूरिदावत् – तरा । वाम् ।

विजामातुरिति वि– जामातुः । उत । वा । घ । स्यालात् ॥

अथ । सोमस्य । प्रयतीति प्र–यती । युवभ्यामिति युव – भ्याम् ।

इन्द्राग्नी इतीन्द – अग्नी । स्तोमम् । जनयामि । नव्यम् ॥ इन्द्राग्नी

इतीन्द्र – अग्नी । नवतिम् । पुरः । दासपत्नीरिति दास – पत्नीः ।

अधूनुतम् ॥ साकम् । एकेन । कर्मणा ॥ शुचिम् । नु । स्तोमम् ।

नवजातमिति नव– जातम् । अद्य । इन्द्राग्नी इतीन्द्र – अग्नी ।

वृत्रहणेति वृत्र –हना । जुषेथाम् ॥ **25 (50)**

**TS 1.1.14.2**

उभा हि वा॑ सुहवा जोहवीमि ता वाज॑ सद्य उशते धेष्ठा ॥

वयमु त्वा पथस्पते रथं न वाजसातये ।

धियेे पूषन्नयुज्महि ॥

पथस्पथः परिपतिं वचस्या कामेन कृतो अभ्यानडर्कं ।

स नो रासच्छुरुधश्चन्द्राग्रा धियंधियꣳ सीषधाति प्र पूषा ॥

क्षेत्रस्य पतिना वयꣳ हितेनेव जयामसि ।

गामश्वं पोषयित्न्वा स नो –[ ] **26**

**TS 1.1.14.2-Padam**

उभा । हि । वाम् । सुहवेति सु–हवा । जोहवीमि । ता । वाजम् ।

सद्यः । उशते । धेष्ठा ॥ वयम् । उ । त्वा । पथः । पते । रथम् । न ।

वाजसातय इति वाज–सातये ॥ धिये । पूषन्न् । अयुज्महि ॥ पथस्पथ इति पथः – पथः । परिपतिमिति परि–पतिम् । वचस्या । कामेन ।

कृतः । अभीति । आनट् । अर्कम् ॥ सः । नः । रासत् । शुरुधः ।

चन्द्राग्रा इति चन्द्र – अग्राः । धियन्धियमिति धियं – धियम् ।

सीषधाति । प्रेति । पूषा ॥ क्षेत्रस्य । पतिना । वयम् । हितेन । इव ।

जयामसि ॥ गाम् । अश्वम् । पोषयित्नु । एति । सः । नः । **26 (50)**

**TS 1.1.14.3**

मृडातीदृशे ॥

क्षेत्रस्य पते मधुमन्तमूर्मिं धेनुरिव पयो अस्मासु धुक्ष्व ।

मधुश्चुतं घृतमिव सुपूतमृतस्य नः पतयो मृडयन्तु ॥

अग्ने नय सुपथा राये अस्मान्. विश्वानि देव वयुनानि विद्वान् ।

युयोद्ध्यस्म–ज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं ँविधेम ॥

आ देवानामपि पन्थामगन्म यच्छक्नवाम तदनु प्रवोढुं ।

अग्नि र्विद्वान्थ्स यजाथ् – [ ] **27**

**<u>TS 1.1.14.3-Padam</u>**

मृडाति । ईदृशे ॥ क्षेत्रस्य । पते । मधुमन्तमिति मधु–मन्तम् ।

ऊर्मिम् । धेनु । इव । पयः । अस्मासु । धुक्ष्व ॥

मधुश्चुतमिति मधु–श्चुतम् । घृतम् । इव । सुपूतमिति सु–पूतम् ।

ऋतस्य । नः । पतयः । मृडयन्तु ॥ अग्ने । नय । सुपथेति सु–पथा ।

राये । अस्मान् । विश्वानि । देव । वयुनानि । विद्वान् ॥ युयोधि ।

अस्मत् । जुहुराणम् । एनः । भूयिष्ठाम् । ते ।

नमउक्तिमिति नमः–उक्तिम् । विधेम ॥ एति । देवानाम् । अपीति ।

पन्थाम् । अगन्म । यत् । शक्नवाम । तत् । अन्विति । प्रवोढुमिति

प्र– वोढुम् ॥ अग्निः । विद्वान् । सः । यजात् । **27 (50)**

**TS 1.1.14.4**

सेदु होता सो अद्ध्वरान्थ् स ऋतून् कल्पयाति ॥

यद्–वाहिष्ठं तदग्नये बृहदर्च विभावसो ।

महिषीव त्वद्–रयि–स्त्वद्–वाजा उदीरते ॥

अग्ने त्वं **पारया** नव्यो अस्मान्थ् स्वस्तिभिरति दुर्गाणि विश्वा ।

पूश्च पृथ्वी बहुला न उर्वी **भवा** तोकाय तनयाय शं ँयोः ॥

त्वमग्ने व्रतपा असि देव आ ( ) मर्त्येष्वा । त्वं ँयज्ञेष्वीड्यः ॥

यद्–वो वयं प्रमिनाम व्रतानि विदुषां देवा अविदुष्टरासः ।

अग्निष्टद् विश्वमा पृणाति विद्वान्. येभि र्देवा৺ ऋतुभिः कल्पयाति ॥ 28

**TS 1.1.14.4-Padam**

सः । इत् । उ । होता । सः । अद्ध्वरान् । सः । ऋतून् । कल्पयाति ॥

यत् । वाहिष्ठम् । तत् । अग्नये । बृहत् । अर्च । विभावसो इति

विभा–वसो ॥ महिषी । इव । त्वत् । रयिः । त्वत् । वाजाः । उदिति ।

ईरते ॥ अग्ने । त्वम् । पारय । नव्यः । अस्मान् । स्वस्तिभिरिति

स्वस्ति –भिः । अतीति । दुर्गाणीति दुः –गानि । विश्वा ॥ पू । च ।

पृथ्वी । बहुला । नः । उर्वी । भव । तोकाय । तनयाय । शम् । योः ॥

त्वम् । अग्ने । व्रतपा इति व्रत– पाः । असि । देवः । एति ( ) ।

मर्त्येषु । आ ॥ त्वम् । यज्ञेषु । ईड्यः ॥ यत् । वः । वयम् ।

प्रमिनामेति प्र–मिनाम । व्रतानि । विदुषाम् । देवाः ।

अविदुष्टरास इत्यविदुः – तरासः ॥ अग्निः । तत् । विश्वम् ।

एति । पृणाति । विद्वान् । येभिः । देवान् । ऋतुभिरित्यृतु –भिः ।

कल्पयाति ॥ **28 (73)**

**(जुषेथामा – स नो – यजा – दा – त्रयोविꣳशतिश्च)** *(A14)*

============================

**Prasna Korvai with starting Padams of 1 to 14 Anuvaakams :-**

( इ॒षे त्वा – य॒ज्ञस्य॒ – शुन्धद्ध्वं॒ – कर्मणे वां – दे॒वो – ऽवधूत॒ं – धुष्टि॒ः – सं वपा॒– म्या दद॒े – प्रत्युष्ट॒ं – कृष्णोऽसि॒ – भुवनमसि॒ – वाजस्यो॒ – भा वा॒ं – चतुर्दश ।)

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(इ॒षे – दृꣳह॒ – भुवन – म॒ष्टाविꣳशतिः ।)

**First and Last Padam of First Prasnam :-**

( इ॒षे त्वा – क॒ल्पयाति । )

॥ हरिः ओं ॥

कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमकाण्डे

प्रथमः प्रश्नः समाप्तः

**Details of Panchati and Padam for Kandam 1 – Prasanam 1 – TS 1.1**

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 1 | 43 |
| Anuvakam 2 | 2 | 88 |
| Anuvakam 3 | 1 | 58 |
| Anuvakam 4 | 2 | 96 |
| Anuvakam 5 | 2 | 111 |
| Anuvakam 6 | 1 | 65 |
| Anuvakam 7 | 2 | 98 |
| Anuvakam 8 | 1 | 72 |
| Anuvakam 9 | 3 | 161 |
| Anuvakam 10 | 3 | 166 |
| Anuvakam 11 | 2 | 115 |
| Anuvakam 12 | 1 | 71 |
| Anuvakam 13 | 3 | 163 |
| Anuvakam 14 | 4 | 223 |
| | 28 | 1530 |